# .. tulasI pUja ..

# ॥ तुलसी पूजा ॥

## Document Information

Text title : tulasii puujaa
File name : tulasipujaa.itx
Category : pUjA
Location : doc_deities_misc
Author : shiva
Language : Sanskrit
Subject : hinduism/religion
Transliterated by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)
Proofread by : Daniel Mohanpersad (danielmohanpersad98 at msn.com)
Translated by : (not translated)
Latest update : August 25, 2002
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 3, 2016

*sanskritdocuments.org*

# ॥ तुलसी पूजा ॥

॥ अथ तुलसी पूजा प्रारंभः ॥

॥ श्रीगणेशाय नमः ॥

॥ अथ तुलसीपूजनं लिख्यते ॥

श्रीमहादेव उवाच ॥

शुभे पक्षे शुभे वारे शुभे ऋक्षे शुभोदये ।
केशवार्थे शुभांशे च रोपयेत्तुलसीं मुनिः ॥ १ ॥

गृहस्थो गृहमध्ये वा गृहस्थोपवनेपि वा ।
शुचौ देशे तु तुलसीमर्चयेद्बुद्धिमान्नरः ॥ २ ॥

मूले च वेदिकां कृत्वा आलवालसमन्विताम् ।
प्रातःसंध्याविधिं कृत्वा स्नानपूर्वं दिने दिने ॥ ३ ॥

गायत्र्यष्टजपं कृत्वा तुलसीं पूजयेत्ततः ।
प्राङ्मुखोदङ्मुखो वापि स्थित्वा प्रयतमानसः ॥ ४ ॥

ध्यायेच्च तुलसीं देवीं श्यामां कमललोचनाम्
प्रसन्नपद्मकल्हारवराभयचतुर्भुजाम् ॥ ५ ॥

किरीटहारकेयूरकुंडलादिविभूषिताम् ।
धवलांशुकसंयुक्तां पद्मासननिषेदुषीम् ॥ ६ ॥ इति ध्यानम् ॥

देवि त्रैलोक्यजननि सर्वलोकैकपावनि ।
आगच्छ भगवत्यत्र प्रसीद तुलसि द्रुतम् ॥ ७ ॥ आवाहनम् ॥

सर्व देवमये देवि सर्वदा विष्णुवल्लभे ।
रत्नस्वर्णमयं दिव्यं गृहाणासनमव्यये ॥ ८ ॥ आसनम् ॥

सर्वदेवमयाकारे सर्वदेवनमोऽस्तुते ।
पाद्यं गृहाण देवेशि तुलसि त्वं प्रसीद मे ॥ ९ ॥ पाद्यम् ॥

सर्व देवमयाकारे सर्वांगमणिशोभिते ।
इदमर्घंगृहानत्वं देवि दैत्यांन्तकप्रिये ॥ १० ॥ अर्घ्यम् ॥

सर्वलोकस्य रक्षार्थं सदा संनिधिकाररिणि ॥

गृहाण तुलसि प्रीत्या इदमाचमनीयकं ॥ ११ ॥ आचमनम् ॥

गंगादिभ्यो नदीभ्यश्च समानीतमिदं जलम् ।
स्नानार्थं तुलसि स्वच्छं प्रीत्या तत्प्रतिगृत्ह्यताम् ॥ १२ ॥ स्नानम् ॥

क्षिरोदमथनोद्भूते चंद्रलक्ष्मीसहोदरे ।
गृत्यतां परिधानार्थमिदं क्षौमांबरं शुभे ॥ १३ ॥ वस्त्रम् ॥

श्रीगंधं कुंकुमं दिव्यं कर्पूरागरुसंयुतम् ।
कल्पितं ते महादेवि प्रीत्यर्थं प्रतिगृत्यताम् ॥ १४ ॥ गंधम् ॥

नीलोत्पलं तु कल्हारमालत्यादीनि शोभने ।
पद्मादिगंधवंतीनि पुष्पाणि प्रतिगृत्यताम् ॥ १५ ॥ पुष्पम् ॥

धूपं गृहाण् देवेशि मनोहारि सगुग्गलम् ।
आज्यमिस्त्रं तु तुलसि भक्ताभिष्टप्रदायिनि ॥ १६ ॥ धूपम् ॥

अज्ञानतिमिरांधस्य ज्ञानदीपप्रदायिनी ।
त्वया तु तुलसि प्रिता दीपोयं प्रतिगृत्यताम् ॥ १७ ॥ दीपम् ।
नमस्ते जगतां नाथे प्राणिनां प्रियदर्शने ।
यथाशक्ति मया दत्तं नैवेद्यम् प्रतिगृत्यताम् ॥ १८ ॥ नैवेद्यम् ॥

नमो भगवते श्रेष्ठे नारयनजगन्मये ।
तुलसि त्वरया देवि पानीयं प्रतिगृत्यताम् ॥ १९ ॥ पानीयम् ॥

अमृतेमृतसंभूते तुलस्यमृतरूपिणि ।
कर्पूरादिसमायुक्तं तांबूलं प्रतिगृत्यताम् ॥ २० ॥ तांबूलम् ॥

दक्षिणा दक्षिणकरे त्वद्भक्तानां प्रियंकरि ।
करोमि ते सदा भक्त्या विष्णुकांते प्रदक्षिणाम् ॥ २१ ॥

नमो नमो जगद्धात्र्यै जगदाद्यै नमो नमः ।
नमो नमो जगद्भूत्यै नमस्ते परमेश्वरि ॥ २२ ॥

प्रसीद मम देवेशि कृपया परया सदा ।
अभिष्टफलसिद्ध्यर्थं कुरु मे माधवप्रिये ॥ २३ ॥

इत्येवमर्चयेन्नित्यं प्रातरेव शुचिर्नरः ।
मध्याह्ने वाथ सायाह्ने पूजयेत्प्रयतो नरः ॥ २४ ॥

॥ इति तुलसीपूजासम्पूर्णा ॥

Encoded by Daniel Mohanpersad danielmohanpersad98@msn.com

.. tulasI pUja ..
was typeset on August 3, 2016

Please send corrections to *sanskrit@cheerful.com*